# Purvachataka Ashtakam

# पूर्वचातकाष्टकम्

## Document Information

Text title : pUrvachAtakAShTakam

File name : pUrvachAtakAShTakam.itx

Category : misc, sAhitya, aShTaka

Location : doc_z_misc_general

Transliterated by : Aaditya Kalyanaraman

Proofread by : Aaditya Kalyanaraman

Description/comments : From Kavya Sangraha, A Sanskrit Anthology, Dr. John Haeberlin, 1847. Check uttarachAtakAShTakam

Latest update : April 29, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# पूर्वचातकाष्टकम्

वातैर्विधूनय विभाषय भीमनादैः
    सञ्चूर्णय त्वमथवा करकाभिघातैः ।
त्वद्वारिबिन्दु परिपालितजीवितस्य
    नान्या गतिर्भवति वारिद चातकस्य ॥ १॥

चातकस्त्रिचतुरान् पयः कणान्
    याचते जलधरं पिपासितः ।
सोऽपि पूरयति भूयसाम्भसा
    चित्रमत्र महतामुदारता ॥ २॥

शक्यते येन केनापि जीवनेनैव जीवितुम् ।
किन्तु कौलव्रतोद्भङ्गप्रसङ्गः परदुःसहः ॥ ३॥

गर्जसि मेघ न यच्छसि तोयं
    चातकपक्षी व्याकुलितोहम् ।
दैवादिह यदि दक्षिणवातः
    क्व त्वं क्वाहं क्व च जलपातः ॥ ४॥

वापी स्वल्पजलाशयो विषमयो नीचापगाहो ह्रदः
    क्षुद्रात्क्षुद्रतरो महाजलनिधिर्गण्डूषमेकं मुनेः ।
गङ्गाद्याः सरितः पयोनिधिगताः सन्त्यज्य तस्मादिमान्
    सन्मानी खलु चातको जलमुचामुच्चैः पयो वाञ्छति ॥ ५॥

बीजैरङ्कुरितं नदीभिरुदितं वल्मीभिरुज्जृम्भितं
    वृक्षैः पल्लवितं जनैश्च मुदितं धाराधरे वर्षति ।
भ्रातश्चातक पातकं किमपि ते सम्यङ्ग जानीमहे
    यत्तेस्मिन्न पतन्ति चञ्चुपुटके द्वित्राः पयो बिन्दवः ॥ ६॥

नदेभ्योऽपि ह्रदेभ्योऽपि पिबन्त्यन्येऽवयःपयः ।

चातकस्य तु जीमूत भवानेवावलम्बनम् ॥ ७॥

नभसि निरवलम्बे सीदता दीर्घकालं
त्वदभिमुखनिविष्टोत्तानचन्चूपुटेन ।
जलधर जलधारा दूरतस्तावदास्तां
ध्वनिरपि मधुरस्ते न श्रुतश्चातकेन ॥ ८॥

इति पूर्वचातकाष्टकं समाप्तम् ।

Encoded and proofread by Aaditya Kalyanaraman

*Purvachataka Ashtakam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*